# आदर्श-प्रश्नपत्रम् (भाषाप्रवेशः - 2)

**अङ्काः - 100**

**समयः - 120 mins**

भाषाप्रवेशपुस्तकस्य द्वितीयभागस्य परीक्षायां कीदृशाः प्रश्नाः भविष्यन्ति इति बोधयितुम् एतद् आदर्श-प्रश्नपत्रं विद्यते। प्रश्नाः तु निम्नरूपेण भवितुम् अर्हन्ति -

1. **धातुरूपाणां लृट्-लोट्लकारयोः रूपाणि प्रयुज्य वाक्यानि निर्मान्तु-**

2. **अधोलिखितेषु धातुषु के सकर्मकाः, के च अकर्मकाः? इति चित्वा तान् प्रयुज्य लघुवाक्यानि निर्मान्तु -**

3. **निम्नवाक्यानि बहुवचनान्ततया लिखन्तु-**

4. **आत्मनेपदिनः धातून् प्रयुज्य स्वीयाः आगामियोजनाः दशभिः वाक्यैः बोधयन्तु -**

5. **विशेष्यानुसारं विशेषणानां तथा च विशेषणानुसारं विशेष्याणां रूपाणि लिखन्तु-**

   **यथा- (द्वे) नामन् (अनेक) आशीर्भिः**

6. निम्नलिखितानां धातूनां शतृ-शानजन्तानि रूपाणि प्रयुज्य कर्मणि भावे च दश वाक्यानि लिखन्तु -

यथा- वर्ध् (स्त्री)

7. निम्नलिखितेषु शुद्धवाक्यानि चिन्वन्तु

9. अधोलिखितानि वाक्यानि कर्मणि भावे वा परिवर्तयन्तु।
यथा- उद्यमिनः सर्वदा विशिष्टकार्याय यतन्ते।

10. निम्नलिखितानां संख्यानां त्रिषु लिङ्गेषु पूरणप्रत्ययान्तानि रूपाणि विलिख्य, तेषु कांश्चन उपयुज्य पञ्च वाक्यानि लिखन्तु-
यथा - 2, 5, 8, 10

11. निम्नलिखितवाक्यं कर्मणि प्रयोगे लट्-लोट्-लङ्-विधिलिङ्-लकारेषु परिवर्तयन्तु ।

यथा- तेन सम्यक् कार्यं क्रियते।

12. दत्तान् शब्दान् उपयुज्य वाक्यानि निर्मान्तु -

13. भवतां गृहे कश्चन उत्सवः आयोज्यमानः विद्यते, तत्र कः कः किं किं कुर्यात् इति भवतः योजनां विधिलिङ्-प्रयोगमाध्यमेन दशभिः वाक्यैः बोधयन्तु -